2. पत्रलेखनम्

(क) अनौपचारिकम् पत्रम्

1. चौरितस्य स्यूतस्य प्राथमिक-सूचनार्थम् आरक्ष्यधिकारिणं प्रति पत्र लिखत।

आरक्ष्यधिकारि – महादेय!
लाजपतनगर – क्षेत्रम्
नवदेहली
विषयः – चौरितस्य स्यूतस्य प्राथमिक-सूचना
श्रीमन्,
अनेन पत्रेण अहं भवते एतत् सूचयामि यत् ह्यः प्रातः एकादश-वादने रेलमैट्रोयानेन विश्वविद्यालयात् अहं लाजपतनगरम् अगच्छम्। मार्गे मम स्यूतं चोरितम् अभवत्। यस्मिन् द्विसहस्रं रूप्यकाणि, कार्यालयस्य परिचय-पत्रं, मैट्रो चिटिकापत्रं मम आधार-परिचयपत्रं चासन्। स्यूतस्य वर्णः कृष्णः आसीत्। अहं प्रार्थये यत् यथाशीघ्रं मम स्यूतम् अन्वेष्य मां कृतार्थं करोतु भवान्।
सधन्यवाद:
निवेदकः
अजयः
निवासस्थानम् – _____
दूरभाष-संख्या – _____
दिनाङ्कः – _____

2. चोरितायाः घटिकायाः प्राथमिक-सूचनार्थम् आरक्ष्यधिकारिणं प्रति पत्र लिखत।

आरक्ष्यधिकारि-महोदय
पटेलनगर-क्षेत्रम्
नवदेहली
विषयः – चोरितायाः घटिकायाः प्राथमिक-सूचना।
श्रीमन्/महोदये
सविनयं निवेदनम् वर्तते यत् अहं भवतः क्षेत्रस्य निवासी अस्मि। अनेन पत्रेण अहम् लवते एतत् सूचयामिम यत् ह्यः अहम् प्रातः पञ्चवादने स्वगृहे प्रविष्टः तदा अहम् अपश्यम् मम गृहे चोरितम् अभवत्। अहम् हतप्रभः अस्मि यत् अस्माकं क्षेत्रे चौर्यकार्य प्रवर्धितम् अस्ति। चौराः दिवानिशम् कदाचिदपि जनानां गृहेषु प्रविश्य चौर्यम् कुर्वन्ति। ते कदाचित् तु जनान् हनन्ति अपि। मम गृहात् द्विलक्ष रुप्यकाणि परिचय-पत्र, आधारपरिचयपत्रादि च चोरितः। अहं प्रार्थये यत् यथाशीघ्र चोरितायाः घटिकायाः प्राथमिक सूचना लिखत। भवान क्षेत्रस्य निवासिषु सुरक्षा प्रति समुचितं प्रयासं करोतु। यथाशीघ्रं मम् स्यूतम् अन्वेष्य च। अहं भवताम् आभारी भविष्यामि।

सधन्यवाद:
निवेदकः
विकास
निवासस्थानम् – _____
दूरभाष-संख्या – _____
दिनाङ्कः – _____

(ख) औपचारिकम् पत्रम्

1. विज्ञानविषयं प्राप्तुं प्राधानाचार्य प्रति आवेदनपत्रम्।

सेवायाम्
प्रधानाचार्यमहोदय!
मीमांसाविद्यालयः, नवदेहली
विषयः – एकादशकक्षायां विज्ञानविषयग्रहणार्थ विशेषानुमतये निवेदनम्।

महोदय,
सविनयं निवेद्यते यदहमस्मिन् विद्यालये प्रथमकक्षातः पठामि। प्रतिवर्षमहम् उत्तमान् अङ्कान् प्राप्य कक्षायां प्रथमस्थानमेव अधिगच्छामि स्म। परमस्मिन् वर्षे परीक्षामध्ये एवाहम् अकस्मात् ज्वरग्रस्तः अभवम्। विज्ञानविषयस्य तु परीक्षाऽपि मया चिकित्सालयात् एव परीक्षाकेन्द्र प्राप्य प्रदत्ता। फलतः मया आशानुकूलः परीक्षापरिणामः न प्राप्तः। विद्यालयनियमानुसार विज्ञानविषय ग्रहणाय प्रतिशतं केवलम् एकस्य एव अङ्कस्य न्यूनता अस्ति।

महोदय! शैशवादेव मम हार्दिकी इच्छा जीवविज्ञाने शोधं कृत्वा वैज्ञानिकः भवितुमासीत्। परं यदि अहं विज्ञानविषये प्रवेशमेव प्राप्तुमसमर्थः भविष्यामि तदा कथमहं स्वकीयं स्वप्नं सार्थकं करिष्यामि। अतः मम करबद्धः अनुरोधः अस्ति। यन्महां विज्ञानविषयं पठितुम् भवान् अनुमतिं प्रयच्छतु। एतदर्थम् अहं पुनः परीक्षणाय अपि सज्जः अस्मि।
आशासे यत् भवान् मम स्थितिमवगत्य मम विशेषानुरोधं स्वीकरिष्यति।
कृपाकाङ्क्षी
भवदाज्ञाकारी शिष्यः

2. अध्ययन प्रति मातरं समाश्वासयितुं पुत्र्या लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयित्वा पुनः लिखत।

कुशलम्, प्रतियोगिताः, कुशलिनी, परिणामः, चिन्तिता, मतिम्, आनन्देन, करणीया,
खेलप्रतियोगितासु, कालः

परीक्षाभवनतः
दिनाङ्कः _____

पूज्यमातृचरणाः,
प्रणतीनां शतम्।
अत्र अहं (i) _____। आशासे भवती पितृमहादेयः च (ii) _____ स्तः। मातः! अहं जानामि यद् भवती मम अर्धवार्षिक परीक्षापरिणामकारणात् (iii) _____ अस्ति। अत्र चिन्ता न (iv) _____ प्रथमसत्रे तु अहं (v) _____ रता आसम्। पठनाय तु (vi) _____ एव न आसीत् परम् अधुना तु सर्वाः (vii) _____ समाप्ताः। अद्यारभ्य अहं केवल पठने एव (viii) _____ विधास्यामि। आशासे वार्षिकपरीक्षायां मम (ix) _____ भवताम् आशानुकूलः भविष्यति। शेषं सर्व (x) _____ त्याः चरणयोः प्रणामाः
भवत्याः पुत्री
सुकन्या

उत्तरम्:
(i) आनन्देन
(ii) कुशलिनी
(iii) चिन्तिता
(iv) करणीया
(v) खेलप्रतियोगितासु
(vi) कालः
(vii) प्रतियोगिताः
(viii) मतिम्
(ix) परिणामः
(x) कुशलम्

3. जलसंरक्षणस्य महत्त्वं वर्णयतः मित्रस्य मित्रं प्रति लिखितं पत्रं मञ्जूषायां पदत्तपदैः पूरयित्वा पुनः लिखत-

देशस्य, प्रयतमानाः, अपव्ययम्, विचारयति, जागरूकता, प्रयासः, जानीमः, जीवनम्, सह, अस्तु

छात्रावासतः
दिनाङ्कः _____

प्रिय मित्र!
सप्रेम नमोनमः,

अत्र कुशलं तत्र (i) _____। भवतः पत्रं पठित्वा अतीव प्रसन्नताम् अनुभवामि यत् भवान् मित्रः (ii) _____ जनसंरक्षणप्रचारकार्ये रतोऽस्ति। एषः तु उत्तमः (iii) _____ अस्ति। वयं सर्वे एव (iv) _____ यत् जीवने जलस्य महत्त्वं तु अतुलनीयम्। जलम् एव (v) _____ इति वयं सर्वे जानीमः परं पुनरपि वयम् अस्य (vi) _____ कुर्मः। अनेन आगामिकाले कियान् भीषणजलसङ्कटः भवेत् इति कोऽपि न (vii) _____ संरक्षणार्थं (viii) _____ अनिवार्या एव। यदि जनाः अत्र ध्यान न दास्यन्ति तदा अस्माकं (ix) _____ स्थितिरपि अफ्रीकादेशवत् भविष्यति। यथा ते जलबिन्दुप्राप्त्यर्थं (x) _____ सन्ति तथा एव अस्मांक देशस्य अपि स्थितिः भविष्यति। अत: जलसंरक्षणार्थं जागरूकता अनिवार्या। शेषं सर्वं कुशलम्। पितृभ्यां चरणयोः चरणवन्दना।
भवतः मित्रम्
उमेशः

उत्तरम्
(i) अस्तु
(ii) सह
(iii) प्रयासः
(iv) जानीमः
(v) जीवनम्
(vi) अपव्ययम्
(vii) विचारयति
(viii) जागरूकता
(ix) देशस्य
(x) प्रयतमाना:

4. स्वस्थभोजनस्य महत्त्वं वर्णयन्त्याः अग्रजायाः अनुजं प्रति पत्रम्।

प्रिय अमित!
सप्रेम नमोनमः।
माता लिखित पत्र प्राप्तम्। तेन पत्रेण मया ज्ञातम् यत् भवान् सन्तुलितभोजनं न सेवते, प्रतिदिनं च 'चाऊमीन-बर्गर' इति खादति। ईदृशं भोजनं स्वास्थयाय सम्यक् न अस्ति। कदाचित् तु अस्य सेवनं कर्तुं शक्यते परं प्रतिदिनं त्वरितभोजनस्य सेवनं स्वास्थ्याय हानिकरम्।
स्वास्थ्याय तु सन्तुलितभोजन ग्रहीतव्यम् एव यतः 'स्वस्थशरीरे एव स्वस्थमनसः वासः' भवति अतः भवान् त्वरितभोजनस्य सेवनं मा करोतु। स्वास्थ्यवर्धकभोजनमेव खादतु। अनेन भवान् कदापि रुग्णः न भविष्यति। भवान् स्वस्वास्थ्यविषये जागरूकः तिष्ठतु इति मे अनुरोधः।
भवतः अग्रजा
अमिता

5. सन्तुलितभोजनमेव सेवनीयम् इति वर्णयतः अग्रजस्य अनुजां प्रति पत्रम् लिखत-

परीक्षाभवनतः
दिनाङ्कः 02.10.20xx

प्रिय अनुजा
शुभाशीषो लसन्तु
पिता लिखित पत्र प्राप्तम्। तेन मया ज्ञातम् यत् भवान् सन्तुलित भोजन व खादतिः प्रतिदिनं च इडली वडा, चाऊमीन, बर्गर इति खादति। ईदशं भोजनम् स्वास्थ्याय सम्यक् न अस्ति। स्वास्थ्यस्य रक्षायै वयम् प्रतिदिनं सन्तुलित भोजन मेव वसवेनीयम्। सेवनं कुर्याम। स्वास्थ्य-वर्धकानि खाद्यानि एव खादेयुः मुहर्मुहुः न खादेयुः। भोजने फलानि, हरितानि शाकानि च खादितव्यम्। सन्तुलितभोजनात् शरीरं स्वस्थम् भवति। अस्थीति दृढ़तरा भवन्ति मनोजः सम्यक् रक्त, सञ्चारं भवति। चित्तं च प्रसन्नम् आगता अतएव वयम् सन्तुलित भोजनेय खादितव्यम्। शेषसर्वे कुशलम्। पितृक्योः चरणयोः चरणवन्दना।

6. प्रतियोगिपरीक्षायाः सन्नद्धीकरणाय आरम्भतः एव सामान्यज्ञानस्य अभ्यासः करणीयः इति उपादिशता पित्रा पुत्र प्रति पत्रम्।

जयपुरतः
दिनाङ्कः 15.04.20xx

प्रिय पुत्र अविनाश!
शुभाशिषो लसन्तु
आशासे त्वं सकुशलः स्वाध्याये रतः असि। पुत्र! अहं जानामि परीक्षायां तव प्रस्तुतिः शोभना भवति। त्वं प्रतिवर्ष कक्षायां प्रथम स्थान प्राप्नोषि इति अहं जानामि। ग्रीष्मावकाशे त्वं कथितवान् यत् तव लक्ष्य प्रतियोगिपरीक्षामुत्तीर्य सङ्घलोकसेवा आयोगक्षेत्रे सेवाप्रदानम् अस्ति। पुत्र! एतल्लक्ष्य प्राप्तुं बाल्यकालादेव सामान्यज्ञानस्य अध्ययनं करणीयम्। अत एव विषयस्य अभ्यासेन समम् एकहोरापर्यन्तं सामान्यज्ञानं वर्धयितुं प्रतिदिनं समाचारपत्रं पठ यदि अधुनातः एतल्लक्ष्य प्राप्तुं नियमितम् अध्ययनं करिष्यसि नूनमेव साफल्यं लप्स्यसे। यदि काऽपि सहायता अपेक्षिता तर्हि अहम् करिष्यामि।
तव जनकः
आशीष कुमारः

7. जीवने सफलता लब्धं परिश्रमस्य महत्त्वं वर्णयन्त्याः मातुः पुत्रीं प्रति पत्रम् पूरयत-

कानपुरतः
दिनाङ्कः 05.09.20xx

प्रिय पुत्रि!
शुभाशीषोलसन्तु
अत्र सर्वं कुशलम् तत्रास्तु। तव प्रधानाचार्यायाः पत्रेण ज्ञातम् यत् त्वं नवमी-कक्षायां विद्यालयेषु प्रथम स्थानं लाब्धवान्। इदं समाचारं ज्ञात्वा अहम् अतिगद्गद अस्मि। भवान् परिश्रमस्य फल प्राप्तवान् आलस्यं त्यक्त्वा यथा भवान् परिश्रम कृतं तदा तु सफलता प्राप्तवान्। अस्माकं जीवन परिश्रमस्व अत्यधिक महत्त्वम् वर्तते। विना परिश्रमेण अस्माकं जीवनं निष्फलाः भवन्ति। अतएव त्वं निश्चयं कुर्याः यत् अग्रिमकक्षायाम् अधिक अंकम्प्राप्तुम् परिश्रमम् करिष्यति। यदि अधुनातः एतत्लक्षयं प्राप्तुम नियमित अध्ययनं करिष्यसि नूनम् एव साफल्यं लपस्यसे। यदि काऽपि सहायता अपेक्षिता तर्हि अहम् करिष्यामि। शेष कुशलम् अस्ति।

8. स्वदेशस्य संस्कृति वर्णयन्त्याः सख्याः विदेशिनी सखीं प्रति पत्र लिखत-

परीक्षाभवनत:
दिनाङ्कः 02.03.20xx

प्रिय सखी
सप्रेम नमोनमः
अत्र कुशलम् तत्रास्तु। अस्मिन् पत्रे अहं त्वाम् स्वदेशस्य संस्कृति विषये वर्णितुम् इच्छामि। अस्माकं संस्कृतिः प्राचीनतमा अस्ति। संस्कृतस्य साहित्यमपि संसारे सर्वेषाम् साहित्यानां प्राचीनतमम् अस्ति। संस्कृते लिखिता: वेदाः उपनिषदाः पुराणानि च हिन्दूनाम अनेके धार्मिकाः ग्रन्थाः सन्ति। संस्कृते एव वाल्मीके रामायणम् वेदव्यासस्य महाभारतं चापि परयामः भारते अनेके कवयः अभवन् ये नाटकानि काव्यानि च संस्कृत भाषायां अलिखन्। आशासे त्वम् अपि स्वदेशस्य संस्कृति विषये किञ्चित् लेखिष्यासि।
भवतः मित्रम्
निरंजन

9. 'पुत्रीं रक्ष पुत्री पाठय' इति अभियानं कथं सार्थक भविष्यतीति स्वविचारं प्रकटयन् मित्रं प्रति पत्रं लिखत-

परीक्षाभवनतः
दिनाङ्कः 28.03.20xx

प्रिय मित्र
सप्रेम नमोनमः
अत्र कुशल तत्र अस्तु। भवतं पत्रं पठित्वा अतीव प्रसन्नताम् अनुभवामि, यत् भवान् मित्रैः 'पुत्रीं रक्ष पुत्री पाठय' प्रचार कार्ये रतोऽस्ति। एषः तु उत्तमः प्रयासः अस्ति। सम्माननीय प्रधानमन्त्रिणा श्रीमोदी सञ्चालितम् एतत् अभियानं कन्याना संरक्षणार्थे सम्पूर्ण देशे प्रचलाति इदम् अभियानं देशाय अति लाभकरं वर्तते। अनने देशे कन्यानाम् संख्याम् वृद्धिः अभवत्। अनेन अभियानेन नारी प्रति सम्मानम् वधिष्यति। शेषं सर्वं कुशलम्। पितृभ्यां चरणयोः चरणवन्दना।
भवतः मित्रम्
सोमेशः